जारकः-रिका, [1]जारकः-रिका, [2]जिजरीषकः-जिजरिषकः-जिजीर्षकः-र्षिका,
[3]जेजिरकः-रिका ;

[4]जरीता-जरिता-त्री, जारयिता-त्री, जिजरीषिता-जिजरिषिता-जिजीर्षिता-त्री,
जेजिरिता-त्री ;

[5]जृणन्[A]-ती, जारयन्-न्ती, जिजरीषन्-जिजरिषन्-जिजीर्षन्-न्ती ; —
जरीष्यन्-जरिष्यन्-न्ती-ती, जारयिष्यन्-न्ती-ती, जिजरीषिष्यन्-जिजरिषिष्यन्-जिजीर्षिष्यन्-न्ती-ती ; —

— जारयमाणः, जारयिष्यमाणः, — [6]जेजीर्यमाणः ; जेजिरिष्यमाणः ;

[7]जीः-जिरौ-जिरः ; — — —

[8]जीर्णम्-जीर्णः-जीर्णवान्, जारितः, जिजरीषितः-जिजरिषितः-जिजीर्षितः;
जेजिरितः-तवान् ;

---

1. 'जनीजॄष्—' (ग. सू. भ्वादौ) इत्यत्र षित्करणेनास्य मित्संज्ञाभावात् 'मितां ह्रस्वः' (6-4-92) इत्युपधाह्रस्वो न । एवं ण्यन्ते सर्वत्र बोध्यम् ।

2. 'इट् सनि वा' (7-2-41) इतीड्विकल्पः । इट्पक्षे 'वृतो वा' (7-2-38) इति दीर्घविकल्पः । इडभावपक्षे 'इको झल्' (1-2-9) इति सनः कित्त्वेन गुणाभावे 'ॠत इद्धातोः' (7-1-100) इतीत्त्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे च रूपम् । एवं सन्नन्ते सर्वत्र रूपत्रयं बोध्यम् ।

3. यङि 'ॠत इद्धातोः' (7-1-100) इतीत्त्वे, द्वित्वे, अभ्यासगुणे च, यकाराकारयोर्लोपे रूपमेवं भवति । एवं यङन्ते सर्वत्र ज्ञेयम् ।

4. 'वृतो वा' (7-2-38) इति इटो दीर्घविकल्पः ।

5. 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे, 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति णत्वे, 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपम् ।

6. इत्वे रपरत्वे 'हलि च' (8-2-77) इति दीर्घे च रूपम् । एवम्, यकि, यति, ल्यपि च दीर्घो बोध्यः ।

7. क्विपि, इत्वे रपरत्वे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घः ।

8. 'श्र्युकः क्किति' (7-2-11) इति इण्निषेधः । इत्वरपरत्वयोः, 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठानत्वे, णत्वे च रूपम् ।

A. 'त्वामेष सम्प्रति मृणामि दृणामि नागं
नो चेज्जृणास्तम नरानकृणन्नृणीहि ॥' धा. का. 3.7.